बीभत्सनीयम् , बीभत्सनीयम् , बीभत्सिषणीयम् ;
बीभत्स्यम् , बीभत्स्यम् , बीभत्सिष्यम् ;
ईषद्बीभत्सः-दुर्बीभत्सः-सुबीभत्सः ; — —
बीभत्स्यमानः, बीभत्स्यमानः, बीभत्सिष्यमाणः ;
बीभत्सः, बीभत्सः, बीभत्सिषः ;
बीभत्सितुम् , बीभत्सयितुम् , बीभत्सिषितुम् ;
बीभत्सा, बीभत्सयिषा, बीभत्सिषा ;
बीभत्सनम् , बीभत्सनम् , बीभत्सिषणम् ;
बीभत्सित्वा, बीभत्सयित्वा , बीभत्सिषित्वा ;
प्रबीभत्स्य, प्रबीभत्स्य, प्रबीभत्सिष्य ;
बीभत्सम् २, बीभत्सित्वा २, } बीभत्सम् २, बीभत्सयित्वा २, } बीभत्सिषम् २ ; बीभत्सिषित्वा २. }

## (1097) " बध संयमने " (X-चुरादिः-1547. सक. सेट्. उभ.)

'बन्धे—' इति चन्द्रः ।

'बध्नाति बन्धने बन्धेर्बाधयेदिति संयमे ।' (श्लो. 120) इति देवः । बाधकः-धिका, बिबाधयिषकः-षिका ; इत्यादीनि सर्वाणि रूपाणि चौरादिक-चाटयतिवत् (488) बोध्यानि । [A]बाधयन्-न्ती ।

## (1098) " बन्ध बन्धने " (IX-क्र्यादिः-1508. अक. अनि. पर.)

'बध्नाति बन्धने बन्धेर्बाधयेदिति संयमे ।' (श्लो. 120) इति देवः ।
बन्धकः-न्धिका, बन्धकः-न्धिका, [1]बिभन्त्सकः-त्सिका, [2]बाबधकः-धिका ;
[3]बन्द्धा-बन्द्ध्री, बन्धयिता-त्री, बिभन्त्सिता-त्री, बाबधिता-त्री ;

---

1. सन्नन्ताण्वुलि, भष्भावचर्त्वादिकेषु रूपमेवम् । सर्वत्र सन्नन्तेषु एवमेव प्रक्रियेति ज्ञेयम् ।
2. यङन्ते सर्वत्र यङ्निमित्तके नकारलोपे, अभ्यासदीर्घे च रूपनिष्पत्तिरिति ज्ञेयम् ।
3. तृचि, 'झषस्तथोः—' (8-2-40) इति धत्वम् । 'झलां जश् झशि' (8-4-53) इति धातुधकारस्य दकारः । तस्य, 'झरो झरि—' (8-4-65) इति पाक्षिको लोपः । एवं तव्यदादिष्वपि प्रक्रिया ज्ञेया ।

A. 'स्वर्गे प्रियंभविष्णुश्च कृत्स्नं शक्तोऽप्यबाधयन् ॥' भ. का. 6. 116.